SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# वैदिकयज्ञस्य समीक्षात्मकम् अध्ययनम्
## Vaidikayajñasya samīkṣātmakam adhyayanam

**Sourav Seth**
Ex-Student, Dept. of Sanskrit
Rabindra Bharati University
Kolkata, West Bengal, India
E-mail: sseth5671@gmail.com

**Abstract:** वैदिकयुगस्य यागस्य विविधाः प्रकाराः सन्ति। यागमधिकृत्य अनेकाः ग्रन्थाः समुपलभ्यन्ते। सर्वेषु ग्रन्थेषु यागस्य स्वरूपं प्राप्यते। ऋषयः वैदिकमन्त्रान् साक्षात् दृष्टवन्तः। उच्यते— 'ऋषयः मन्त्रद्रष्टारः, न तु स्रष्टा'। निरुक्तकारेण यास्काचार्येण उक्तम्— 'ऋषिर्दर्शनात्' इति। अनेन शोधपत्रेण वैदिकयुगस्य यागस्य स्वरूपं कर्मानुष्ठानं च मया संक्षेपेण प्रदीयते। अस्मिन् शोधपत्रे पूर्वाचार्येण मतमनुसृत्य प्रकृततया प्रकृतियागस्य पञ्चभेदाः प्रदर्शयन्ते। अत्र होमः, इष्टिः, पशुः, सोमः, सत्रश्च एते प्रकृतेः यागस्य मूलस्वरूपं यागपद्धतिं कर्मानुष्ठानञ्च सरलतया मया उपस्थाप्यते। अस्य शोधपत्रस्य लेखने मम आचार्यः श्रीमन् सुमन्तमहोदयः विशेषसाहाय्यं कृतवान्। आचार्यस्य कृतेऽहं साधुवादं धन्यवादं च ज्ञापयामि।

**Keywords:** अग्न्याधानः, आहूतिः, आज्यम्, दीक्षणियेष्टिः, सोमाभिषवम्, अग्निहोत्रम्, अग्निष्टोमः।

**शोधपत्रस्य उद्देश्यम्—**

कस्यापि ग्रन्थस्य रचनायाः निमित्तं तस्य प्रयोजनम् उद्देश्यं च भवतः एव। शास्त्रे उक्तम्□ 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'। अस्य शोधपत्रस्य अपि एकम् उद्देश्यम् अस्ति। वैदिकयागविषये सरलतया अववोधयितुं 'वैदिकयज्ञस्य समीक्षात्मकम् अध्ययनम्' इति नामकरणं मया गृह्यते। अनेन शोधपत्रेण वैदिकस्य यागपद्धतिविषये सारल्येन संक्षेपेण च सम्यक्तया ज्ञानं प्राप्तुं शक्यते इति।

"ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥
ॐ शान्तिः शान्तिः शान्तिः"॥[1]

**भूमिका—**

वैदिकयुगे धर्मानुष्ठानेन प्रकृततया यज्ञस्य कर्मानुष्ठानम् एव स्वीक्रियते। विशेषतया यज्ञेन देवलोकेन सह मनुष्याणां सायुज्यलाभस्य एकं माध्यमम् इति दृश्यते। पारिभाषिकतया यागः इत्यनेन देवतायाः देवगणस्य वा अनुग्रहलाभार्थं तान् उद्दिश्य द्रव्यस्य आहुतिप्रदानकर्म सम्पादयति इति। विषयेऽस्मिन् कात्यायन-श्रौतसूत्रे सविस्तरेण उल्लिखितम् अस्ति।[2]

व्युत्पत्यनुसारं यज्-धातुना सह 'घञ्' प्रत्ययस्य योगे 'यागः' इति पदं सिद्धम्। अत्र मुख्यतया ऋग्वेदस्य पुरोहितः होता एव देवानाम् आह्वयति, अपि च देवताः उद्दिश्य आहुतिप्रदानं सम्पादयति। इत्यस्मात् कारणात् होतृशब्दस्य 'आवाहनार्थे आहुतिप्रदानार्थे' चेति द्विविधा व्युत्पत्यिः प्राप्यते।[3] परवर्तिनी द्वे कर्मणि द्विधा विभज्येते। देवानाम् आह्वनार्थं कर्म होता सम्पादयति, अन्यत् आहुतिप्रदानकर्म अध्वर्युः सम्पादयति च। अत्र 'आ' उपसर्गपूर्वकेण हु-धातुना सह क्तिन् प्रत्यययोगेन आहुतिः इति पदं सिद्धम्। अध्वर्युः इति पदस्य व्युत्पत्यनुसारं निरुक्तकारेण यास्काचार्येण सविस्तरेण उक्तम्। तेन मतानुसारेण 'अध्वरं यज्ञं वा यः चालयति स एव अध्वर्युः' इति।[4] वैदिकयागे वेदीनिर्मानकार्यं, होमकुण्डनिर्मानं पुरोडाशादेः हविर्द्रव्यं पाकक्रियाम् आहुतिप्रदानकर्म च इत्यादीनि कर्माणि अध्वर्युः एव सम्पादयति। तदर्थं यज्ञनिष्पादने तस्य स्थानम् उपरि वर्तते। वैदिकयागेषु सोमयागः एव प्रधानम् इति मन्यते। तस्मिन् यागे षोडश ऋत्विजः यज्ञकार्यं सम्पादयन्ति।

वेदे यज्ञकर्माश्रित्य कर्मकाण्डरूपेण ब्राह्मणग्रन्थाः प्रकाशन्ते। तदर्थं यज्ञः एव श्रेष्ठतमं कर्म इति वैदिकशास्त्रे सर्वत्र एव दृश्यते।[5] ऋग्वेदीयस्य ऐतरेयब्राह्मणे यज्ञं 'सुतर्मा नौः' इत्यनेन विधीयते। तत्र यज्ञः सर्वविघ्नहरणाय एकया नौकया तुल्यः दरीदृश्यते। यज्ञेन एव सर्वपापहरणं सर्वेषां पवित्रताविधायकं च कार्यं निष्पद्यते।

सामग्रिकतया वैदिककर्मानुष्ठानः श्रौतं गृह्यं चेति द्विधा विभज्यते। श्रौतकर्म इत्यनेन वेदस्यान्तर्गते देवतायाः तुष्टिविधानार्थं यानि कर्माणि समुपलभ्यन्ते, तानि एव श्रौतकर्माणि। अपरेण गृह्यकर्मणा गृहस्थस्य जन्माद्यतः अपवर्गपर्यन्तं ये ये संस्काराः यागादयश्च सन्ति, तानि कर्माणि गृह्यकर्माणि एव। उभयविधं यज्ञकर्म सम्पादयितुम् अग्निः अपरिहार्यः अस्ति। किमपि द्रव्यं हविर्द्रव्यं वा यदि अग्नौ निक्षिपेत्, तर्हि सः अग्निः तत् द्रव्यं देवतायाः समीपे निर्वहति। इत्यस्मात् कारणात् अग्निः 'हव्यवाहः' इत्युच्यते। इतोऽपि अग्निरेव देवतानां मुखस्वरूपम् इति।[6] यज्ञकर्मणा सह अग्नेः सम्बन्धः अपरिहार्यः अस्ति। तदर्थं ऋग्वेदस्य अग्निसूक्ते अग्निं पुरोहितं ऋत्विजं चेति कथ्यते।[7] अवैवाहिकस्य जनस्य श्रौताग्निस्थापने अधिकारो नास्ति। केवलम् आहिताग्निः, त्रैवर्णिकः सपत्नीकः यजमानश्चैव श्रौतयागे अधिकारी। विषयेऽस्मिन् विविधेषु ब्राह्मणग्रन्थेषु श्रौतसूत्रादिषु च विवरणं प्राप्यते।

साधारणतः वैदिकस्य श्रौतकर्मणि त्रिविधस्य अग्नेः आवश्यकता दृश्यते। तेषां नामानि यथा— 'गार्ह्यपत्याग्निः आहवनीयाग्निः दाक्षिणाग्निश्चेति'। यज्ञवेदीनिर्माणस्य अनन्तरं पश्चिमदिशि गार्ह्यपत्याग्निः, दक्षिणे दाक्षिणाग्निः, पूर्वदिशि आहवनीयाग्निः च स्थापनीयं कर्तव्यम् इति। गार्हपत्याग्नेः आकारः वृत्ताकारः, दाक्षिणाग्नेः आकारः अर्धवृत्ताकारः, आहवनीयाग्नेः आकारश्च चतुष्कोणः। श्रौतसूत्रानुसारतः गृहस्थस्य यज्ञादिकार्यं सम्पादयितुं पश्चिमदिशि गार्हपत्याग्नेः प्रयोजनम् अस्ति। पूर्वदिशि देवताः उद्दिश्य आहूतिप्रदानार्थम् आहवनीयाग्निः अपरिहार्यः। दक्षिणदिशि पितृगणस्य कृते आहुतिप्रदानं करणीयम्।

सामग्रिकतया वैदिकयज्ञाः पञ्चविधाः भवन्ति। एतद्विषये शतपथब्राह्मणे सविस्तरेण कथितम्। तत्र यज्ञः 'पाङ्क्तः' अर्थात् पञ्चसंख्यासमन्वितः इति उक्तम्।[8] श्रौतयागस्य स्वरूपविभाजने ऋग्वेदीयऐतरेयारण्यकेऽपि यज्ञस्य पञ्चप्रकाराः दृश्यन्ते। तत्रोच्यते अग्निहोत्रम्, दर्शपूर्णमासः, चातुर्मास्यं, पशुः, सोमश्चेति।[9]

इतोऽपि वैदिकयागः प्रकृतिविकृतिभेदात् द्विविधः। प्रकृतियागस्य अपरं नाम प्रधानयागः अङ्गीयागः वा। सर्वेषु यागेषु एकः मूलस्वरूपः यागः प्रकृतिरुच्यते। प्रकृतियागमुद्दिश्य विविधाः सहायकाः यागाः अनुष्ठीयन्ते। ते यागाः विकृतियागाः इति कथ्यन्ते। प्रकृतेः विकृतेश्च यागस्य स्वरूपविषये वेदभाष्यकारेण सायणाचार्येण तैत्तिरीयसंहितायां भाष्यभूमिकायां सविस्तरेण वर्णितमस्ति।[10]

वैदिकयागस्य पञ्चविधयः प्रकृतयः सन्ति। यथा- होमः, इष्टिः, पशुः, सोमः, सत्रश्च। सत्रयागः प्रकृततया सोमयागस्य अन्तर्भूतः। तथापि संवत्सरयावत् अयं यागः प्रचलति। तदर्थम् अयं सत्रयागः पृथक्तया परिगण्यते। होमयागस्य प्रकृतिः अग्निहोत्रम्, इष्टियागस्य प्रकृतिः दर्शपूर्णमासः, पशुयागस्य प्रकृतिः प्राजापत्यपशुः, सोमयागस्य प्रकृतिः अग्निष्टोमः, सत्रयागस्य प्रकृतिरुच्यते गवामयनसत्रश्चेति सर्वजनविश्रुतः। अधुना पञ्चविधस्य यागस्य स्वरूपं सविस्तरेण मया प्रदीयते।

**अग्निहोत्रम्—** होमयागस्य प्रकृतिरुच्यते अग्निहोत्रम् इति। कृताधानः त्रैवर्णिकः आहिताग्नियजमानः सपत्नीकश्च अग्निहोत्रयागे अधिकारी भवति। स्मृतिकारमतेन कर्मेदं त्रैवर्णिकेन यावज्जीवनम् अनुष्ठेयम् इति। आश्वलायनश्रौतसूत्रानुसारतः परिभाषारूपेण यानि यानि पदानि व्यवहृतानि तेषु अन्यतमम् अग्न्याधेयम्। अग्न्याधेय-आधान-अग्न्याधानश्च एते शब्दाः पर्यायवाचिनः आ-धा + ल्युट् इत्यनेन आधानम् इति पदं सिद्धम्। संक्षेपेण अग्न्याधानः आधानः वा इत्यनेन विधिपूर्वकम् अग्निस्थापनं बुध्यते। अग्निस्थापनेनैव श्रौतकर्म आरभ्यते। त्रैवर्णिकं सपत्नीकम् आहिकाग्निश्च यजमानं निकषा अग्निहोत्रयागः नित्यकर्म। परन्तु कदापि फलाकाङ्क्षावशतः अग्निहोत्रकर्म काम्यम्। अत्र आहुतिद्रव्यस्य विचित्र्यं दृश्यते। अस्मिन् विषये आश्वलायनश्रौतसूत्रे उल्लिखितम् अस्ति— 'पशुकामः स्वर्गकामः वा पयसा जुहुयात्।' इन्द्रियकामः दध्ना यवाग्वा ग्रामकामः ओदनेन अन्नकामः च इति।

विशेषतया अयं यागः जरामर्यः सत्रयागः इत्युच्यते। कारणवशात् जरा-मृत्युर्व्यतीतः वा अस्य यागस्य अनुष्ठानात् गृहस्थस्य कापि अव्याहतिः नास्ति। विषयेऽस्मिन् शतपथब्राह्मणोक्तम्[11]— ब्राह्मणस्य कर्ममिदं नित्यम्।– 'ब्राह्मणोरहरहः अग्निहोत्रं जुहुयात्' इति। यदि अनुष्ठानकार्यसम्पादने विघ्नं भवति, तर्हि ब्राह्मणस्य पुत्रः जामाता भ्राता वा कार्यं सम्पादयति। अध्वर्युः इति ऋत्विग् अग्निहोत्रानुष्ठाने अधिकारी भवति।[12]

नित्यकर्मरूपेण अग्निहोत्रानुष्ठाने प्रधानम् आहुतिद्रव्यं 'दुग्धम्' इति। तदर्थं यजमानः एकां गावं प्रतिपालयति। सा 'अग्निहोत्रीगौः' इत्युच्यते। अयं यागः द्विदिवसं व्याप्य अनुष्ठीयते।

अग्निहोत्रस्य उपक्रमकालः सायम्। सायंकाले यदा सूर्यरश्मयः भूभागं परित्यज्य वृक्षाग्रे प्रकाशमानाः दृश्यन्ते तदा सायं होमः अनुष्ठेयः। सपत्नीकः यजमानः अग्निशालां प्रविश्य आहवनीयाग्नौ समिधाकाष्ठेन अग्निस्थापनमेव अग्न्याधानं कार्यं सम्पादयति। अस्मिन् यागे सायंकाले यजमानेन अग्निदेवतामुद्दिश्य 'भूर्भुवः स्वः ॐ अग्निज्योतिः ज्योतिरग्निः स्वाहा' इत्यनेन मन्त्रोच्चारणेन पयसा प्रथमाहूतिः प्रदीयते। तत्र अग्निरेव प्रधानं प्रथमः च देवता। पुनः द्वितीयक्षणेपि प्रजापतिदेवमुद्दिश्य उपांशुमन्त्रोच्चारणेन एका आहूतिः दीयते। तदनन्तरं गार्हपत्याग्नौ प्रथमाहूतिः अग्निदेवं प्रजापतिदेवं च उद्दिश्य प्रदीयते। तत् पश्चात् दाक्षिणाग्नौ आहूतिप्रदानं करणीयम्। तत्र प्रथमाहुतेः देवता 'अग्निरन्नपतिः', द्वितीयाहूतेः देवता 'प्रजापतिश्च' भवतः। तदा त्रयाग्नौ समिधाकाष्ठं निक्षिप्य यज्ञकार्यं निष्पद्यते। परदिवसे प्रातःकालेऽपि अनेन प्रकारेण अग्निहोत्रानुष्ठानं भवति। प्रातः सूर्यदेवतामुद्दिश्य 'भूर्भुवः स्वः ॐ सूर्यो ज्योतिः ज्योतिः सूर्यः स्वाहा'। इत्यनेन मन्त्रोच्चारणेन आहूतिरूपेण दुग्धं प्रदीयते। सायंकाले अस्य यागस्य प्रथममनुष्ठानं भवति अपि च अग्निरेव प्रधानदेवता, तदर्थम् अस्य यागस्य 'अग्निहोत्रम्' इति नामधेयम्। विषयेऽस्मिन् आपस्तम्बश्रौतसूत्रे सविस्तरेण वर्णितम्।[13]

अग्निहोत्रानुष्ठानम् उदिते अनुदिते वा होतव्यम्। सूर्यदयानन्तरं ये खलु वैदिकाः अग्निहोत्रं कुर्वन्ति ते उदितहोमिनः। ये खलु सूर्योदयात् पूर्वमेव अग्निहोत्रमनुतिष्ठन्ति ते अनुदितहोमिनः। वह्वृचः कातीयाः छान्दोगाश्च अनुदितहोमिनः, अन्यत्र तैत्तिरीयाः कठाः मैत्रायणीयाश्च उदितहोमिनः इति शाखाभेदतः होमिभेदः।

**दर्शपूर्णमासः—** इष्टियागस्य प्रकृतिरुच्यते दर्शपूर्णमासः। वेदभाष्यकारेण सायणाचार्येण दर्शपूर्णमासौ यागः एव न केवलम् इष्टियागानां प्रकृतिरपि च सर्वेषां यागानां प्रकृतिरूपेण भवितुं शक्यते। अस्मिन् विषये आपस्तम्बश्रौतसूत्रे सविस्तरेण वर्णितमस्ति।[14] सर्वेषां यागानां प्रकृतिस्वरूपयोः दर्शपूर्णमासयोः व्याख्यानम् आश्वलायनेन प्रथमतया कृतम्।[15] 'दर्शश्च पूर्णमासश्च इति द्वन्द्वसमासेन दर्शपूर्णमासौ' भवति। अत्र दर्शः शब्दस्यार्थः 'सूर्येन्दुसङ्गमः अमावस्या वा' 'पूर्णमासशब्दस्यार्थः पूर्णिमा' इति। अतः या एव इष्टिः द्विदिवसं व्याप्य अनुष्ठीयते यत्र प्रथमानुष्ठानं पूर्णिमायां तिथौ द्वितीयानुष्ठानञ्च अमावस्यायां भवतः। अयं यागः द्विदिवसं व्याप्य अनुष्ठीयते, तदर्थं यागोऽयं दर्शपूर्णमास इति नामधेयम्।

य एव यजमानः त्रैवर्णिकः कृताधानः सपत्नीकश्च स एव दर्शपूर्णमासयागे अधिकारी। अयं यागः नित्यः काम्यश्चेति द्विविधं भवितुं अर्हति। ये वैदिकाः समग्रजीवनव्यापि अनुष्ठानं कुर्वन्ति, तेषां समीपे अयं यागः नित्यः। परन्तु फलाकाङ्क्षायै ये यागं कुर्वन्ति, तान् निकषा काम्यः इति। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'(आ.श्रौ) निरविच्छन्नतया त्रिंशद्वर्षयावत् दर्शपूर्णमासयागस्य अनुष्ठानं कृत्वा परित्यक्तुं शक्यते।[16] अस्मिन् यागे होता अध्वर्युः आग्नीध्रः ब्रह्मा च चत्वारः ऋत्विजः यागं सम्पादयन्ति।[17]

प्रथमानुष्ठानं पौर्णमास्यां तिथौ प्रातः आरभ्य परस्मिन् एव दिवसे पूर्वाह्णे समापनीयम्। द्वितीयञ्च अनुष्ठानम् अमावस्यायां प्रातः आरभ्य तदनन्तरं प्रतिपदि अपराह्णे समापनीयम्। यथा दर्शयागे अग्न्याधानम् अन्वाधानं वा हविर्निर्वापनम् अवहननं प्रेषणं हविश्श्रवणं वेदिनिर्माणादिकं यज्ञपात्रादिग्रहणम् इत्यादीनि कर्माणि पौर्णमासयागवत् करणीयानि। अमावस्यायां त्रीणि प्रधानानि कर्माणि सन्ति— आग्नेयः, पुरोडाशः, ऐन्द्रो, दधियागः, ऐन्द्रो पयोयागश्चेति।

दर्शपूर्णमासयागे प्रधानम् आहूतिद्रव्यं पुरोडाशः इति। वेदभाष्यकारेण सायणाचार्येण उक्तम्।[18] अस्मिन् यागे पौर्णमास्यां त्रीणि प्रधानानि कर्माणि— अग्निदेवतामुद्दिश्य पुरोडाशद्रव्ययागः प्रथमः विष्णुप्रजापत्यग्नीषोमान्यतमदेवता उपांशुयाज्या द्वितीयः। अग्निषोमदेवता पुरोडाशद्रव्यः यागस्तृतीयः। तत्र अग्निदेवतामुद्दिश्य अष्टकपालपुरोडाशं निर्वपेत्, तदनन्तरम् अग्निषोमौ उद्दिश्य एकादशकपालपुरोडाशं च निर्वपेत्। यागात् पूर्वं यजमानेन सामिधेनीमन्त्रं पठित्वा सम्यक्तया अग्नेः आधानं क्रियते। पूर्णिमायाम् आज्याहूतिः करणीया। भाष्यकारेण सायणेन उक्तम्— 'सर्पिविलीनम् आज्यं स्यात्' इति। अनेन यागः सम्पद्यते। प्रधानयागात् पूर्वं प्रयाजयागः करणीयमः। तस्मिन् यागे पञ्चदेवताः सन्ति। क्रमेण स्विष्टकृद्यागः इडाभक्षणादिकर्म, ऋत्विग्दक्षिणा अनुयाजाः पत्नीसंयाजादिकं कृत्वा पौर्णमासयागाः समाप्यन्ते।

दर्शयागे प्रधानकर्माणि आग्नेयपुरोडाशकर्मानुष्ठीयन्ते, तथापि दधिपयोयागः ऐन्द्रोविशेषरूपेण अनुष्ठितो भवति। अमावस्यायां प्रातः वत्स्यापकरणं नाम कर्मानुष्ठेयम्।[19] प्रधानयागानन्तरम् अनुयाजः भवति। अन्तिमे यजमानकर्मरूपेण गोमतीजपं कृत्वा यज्ञं विसृजेत्। अस्मिन् यागे याज्या पुरोरनुवाक्या च पठनीया। हविर्द्रव्यप्रदानावसरे पठ्यमाना ऋक् याज्या इत्युच्यते। हविर्द्रव्यप्रदानात्प्राक् पठ्यमाना ऋक् पुरोरनुवाक्या इत्युच्यते च। वैदिकसाहित्ये दर्शपूर्णमासयागस्य विशिष्टता सर्वत्र एव स्वीक्रियते।

**पशुयागः—** पशुयागस्य प्रकृतिरूच्यते प्राजापत्यपशुः। आहिताग्निः सपत्नीकः यजमानः अस्मिन् यागे अधिकारी एव। वर्षाकाले अयं यागः अनुष्ठीयते। यागेऽस्मिन् प्रधानाहूतिद्रव्यं 'छागः' इति। छागस्य हृद्यन्त्रं वपां चेति आहूतिरूपेण प्रदीयते। तदर्थं पशुयागः इति नामधेयम्। मन्त्रपूतं छागं प्लक्षवृक्षेण स्पर्शं कृत्वा— 'अग्नये त्वा जुष्टमुपाकरोमि' इति पशुबन्धोः कारणात् विविधानि मतानि प्राप्यन्ते। केचन मन्यन्ते पशुबन्धक्रिया न समीचीना। अपि तु केचन यज्ञे पशोः आहुतेः करणेन देवतया सह पश्वात्मा सायुज्यलाभं कुर्वन्ति। यजुर्वेदे निहतपशोः स्वर्गप्राप्तेः वचनं स्पष्टतया उल्लिख्यते।[20] आहूतिप्रदानानन्तरं यजमानेन इडारूपेण पशुमांसभक्षणेन स्वर्गप्राप्तिः भवितुम् अर्हति इति सर्वजनविश्रुतः। वृत्रवधाख्याने कथा प्राप्यते।[21]

**सोमयागः—** सोमयागस्य प्रकृतिः अग्निष्टोमः ज्योतिष्टोमः वा इति कथ्यते। वैदिकयागेषु सोमयागः एव अधिकतया व्ययबहुलः। अस्मिन् यागे 'सोमलतायाः रसः' एव प्रधानम् आहूतिद्रव्यम्। तदर्थं सोमयागः इत्यभिधेयम्। अन्यत्र ऋग्वेदस्य नवममण्डले देवतारूपेण सोमं कल्पते। तत्र सोमदेवतायाः स्तुत्यार्थकाः मन्त्राः प्राप्यन्ते।[22] सोमराजा उत्तरदिशि तिष्ठति।

सोमयागस्य विविधाः प्रकाराः सन्ति। तन्मध्ये एकाहः अहीनं सत्रश्च विशेषतया उपदिष्टम्। एकदिवसव्यापि अनुष्ठानं यागः एकाहः इत्युच्यते। द्वितीयदिवसतः द्वादशदिवसपर्यन्तम् अनुष्ठानमिदं अहीनम् इति। द्वादशदिवसतः संवत्सरपर्यन्तम् अनुष्ठानम् सत्रम् इत्युच्यते। सर्वेषाम् एकाहयागानां साधारणतया ज्योतिष्टोमः इति नामधेयं सोमयागस्य अनुष्ठानस्य सप्त पद्धतयः सन्ति। अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्रं, वाजपेयः आप्तोर्याम् चेति।

त्रैवर्णिकः सपत्नीकः यजमानः अस्मिन् यागे अधिकारी भवति। कात्यायनश्रौतसूत्रे अस्य यागस्य समयकालः वर्णितः अस्ति। उक्तञ्च श्रौतसूत्रे अयं यागः वसन्तकाले एव अनुष्ठीयते।[23] यद्यपि सोमलतायाः रसः एव अस्य यागस्य प्रधानम् आहूतिद्रव्यं तथापि ताण्ड्यब्राह्मणे उक्तम्— "यदि सोमं न लभेत तर्हि पूतिकया यागः कर्तव्यः इति"।[24]

अयं यागस्य सम्पादनार्थं षोडश ऋत्विजः आवश्यकाः। चत्वारः प्रधानाः ऋत्विजः सन्ति— होता, उद्गाता, आग्नीध्रः ब्रह्मा च। यजमानेन सह कुत्रापि सप्तदशसंख्यकाः ऋत्विजः उल्लिखिताः अस्ति।[25] सोमयागानुष्ठानस्य विविधाः पद्धतयः क्रमानुसारेण मया अत्र उल्लिख्यन्ते।

सोमयागस्य कृते यजमानेन प्रथमं ऋत्विग्वरणं कृतम्। सोमयागानुष्ठानात् पूर्वं यजमानः दीक्षां लभते। इदं दीक्षानुष्ठानम् इष्टियागेन अनुष्ठितो भवति। अस्मिन् यागे अग्निः विष्णुश्च प्रधानदेवताद्वयं तौ उद्दिश्य पुरोडाशं निर्वपेत्। अग्निमुद्दिश्य अष्टकपालपुरोडाशः विष्णुमुद्दिश्य त्रिकपालपुरोडाशः प्रदीयते। विषयेऽस्मिन् ऐतरेयब्राह्मणे उल्लिखितम्[26] इदं दीक्षानुष्ठानं यजमानस्य नवजन्मतुल्यम्। अतः अत्र गर्भसंस्कारवत् अनुष्ठानं दृश्यते। अस्मिन् विषये ब्राह्मणेऽपि उक्तम्।[27] द्वितीयदिवसे प्रातः प्रायणीयेष्टेः अनुष्ठानं करणीयम्। अस्मिन् यागे पञ्चदेवताः सन्ति। 'पथ्यास्वस्तिः अग्निः सोमः सविता अदितिः च'। अत्र आहुतिरूपेण 'चरुः' प्रदीयते। अनेन यागारम्भः आरभ्यते। प्रायणीयेष्टेः अनन्तरं सोमलताक्रयः अनुष्ठानं भवति। तदनन्तरं क्रमाणुसारं आतिथ्येष्टिः, प्रवर्गानुष्ठानं विधीयते। पञ्चमदिवसे प्रकृतम् अनुष्ठानं विधीयते। तत्र सोमलतायाः रसनिष्काषणं सम्पादयति। कर्मेदं 'सोमाभिषवः' इत्युच्यते। अस्मिन् दिवसे सूर्योदयात् पूर्वं विहगस्य कुजनात् पूर्वं च होता एव अग्निम् उषाम् अश्विनौ च उद्दिश्य शताधिकाः ऋचः पठति। अस्य नाम प्रातरनुवाकः अग्निष्टोमयागे प्रधानाहूतेः द्रव्यं 'गौः', गोसंख्या एकशतम् इति उल्लिखितम्। अनेन प्रकारेण सोमयागः निष्पद्यते।

**सत्रयागः—** सत्रयागस्य प्रकृतिरुच्यते गवामयनसत्रः। अयं गवामयनयागः सोमयागस्य अन्तर्भूतः। अतः गवामयनस्य यागस्य प्रकृतिः अग्निष्टोमः। प्रकृततया गवामयनसत्रयागस्य अनुष्ठानं द्वादशदिवसात् संवत्सरव्याप्य अनुष्ठीयते।[28] सोमयागे ये ये नियमाः सन्ति ते नियमाः गवामयनसत्रयागेऽपि प्रयुज्यन्ते। अहिनयागः सत्रयागश्च तुल्यः इति मन्यते। अहिनयागे एकः यजमानः तिष्ठति परन्तु सत्रयागे न्यूनतमः सप्तदशसंख्यकाः ऋत्विजः सन्ति।[29] सामवेदीयपञ्चविंशब्राह्मणे वर्णितमस्ति सत्रयागस्य सम्पादनार्थम् एकषष्ठ्याधिकत्रिंशतं दिनानि आवश्यकानि। अतः संवत्सरव्यापी अयं यागः प्रचलति। गवामयनः सोमयागस्य अन्तर्भूतः।

अतः सोमयागवत् अयं यागः निष्पद्यते।

**उपसंहारः—** वैदिकयुगे यानि प्रधानानि श्रौतयागानि सन्ति। अस्मिन् शोधपत्रे तेषां परिचयः संक्षेपेण मया प्रदत्तः। ब्राह्मणग्रन्थेषु श्रौतग्रन्थेषु च इतोऽपि विविधाः यागाः सन्ति। ते प्रकृतियागस्यान्तर्भूताः इति। अस्मिन् शोधपत्रे 'वैदिकयज्ञस्य समीक्षात्मकम् अध्ययनम्' इत्यनेन नामकरणेन यागस्य स्वरूपविषये किञ्चित् सम्यक् ज्ञानं धारणां च मया स्थापितम्। यागः यज्ञश्च पर्यायवाची शब्दः। यज्ञः इत्यस्यार्थः व्यापकतरः। वैदिकमन्त्रोच्चारणेन देवतामुद्दिश्य अग्न्याधानं कृत्वा द्रव्यस्य त्यागस्य अनुष्ठानं यज्ञकर्म इत्यभिधेयम्। यज्-धातोरत्तरः नञ् प्रत्यययोगेन यज्ञः इति पदं प्राप्यते। यज्-धात्वर्थः यागः इति। श्रौतसूत्रे पारिभाषिकार्थे यागस्यार्थः प्राप्यते— 'उद्दिश्य देवतां द्रव्यत्यागः यागः इत्यभिधीयते'।[30] विशेषतया यज्ञेन देवलोकेन सह मनुष्याणां सायुज्यलाभस्य एकं माध्यमम् इति दृश्यते। प्रकृततया यज्ञस्यार्थः मनुष्यलोकेन त्यागेन एव परमार्थप्राप्तिरिति। यदि इदं परमं गुह्यतमम् अर्थम् अवबोधयितुं शक्यते तर्हि परमार्थप्राप्तिः अचिरेण लभ्यते। तदर्थं परमेश्वरः वासुदेवः श्रीकृष्णः श्रीमद्भगवद्गीतायाम् अर्जुनमुद्दिश्य परमं गुह्यतमं ज्ञानं दत्तवान्—

इदं तु ते गुह्यतमं प्रवक्षाम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥[31]

## Endnotes

1. शान्तिमन्त्रः- ई.उ.
2. 'द्रव्यं देवतात्यागः'- का. श्रौ,१/२/२.
3. 'होतुः हवातव्यस्य'- नि,४/२६.
4. 'अध्वरं यूनक्तिः इति अध्वर्युः'- नि, १/८/१. यद्वा स तत्र यथाभाजनं देवता अमूमावहामुमावहेत्यावाहयति तदेव होतुः होतृत्वं होता भवति- ऐ.ब्रा, १/१.
5. 'यज्ञो हि श्रेष्ठतमं कर्म' - तै. ब्रा, ३/२/१/४. यज्ञो वै श्रेष्ठतमं कर्म- शत.ब्रा, १/७/१/५.
6. 'अग्निर्वै देवानां मुखम्' - कौ.ब्रा,३/६, ५/५.
7. 'अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम्।' – ऋ.सं, १/१/१.
8. ' पाङ्क्तो वै यज्ञः'- शतः.ब्रा, १/७/२/१०.
9. ' स एष यज्ञः पञ्च विधोरग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः'- ऐ.आ, २/३/३.
10. ' प्रकर्षेण अङ्गोपदेशो यत्र क्रियते सा प्रकृतिः कृत्स्नाङ्गविषयत्वमुपदेशस्य प्रकर्षः। विकृतिषु तु विशेषाङ्गमात्रस्योपदेशः क्रियते अङ्गान्तराणि तु प्रकृतेऽतिदिश्यन्ते। अतोऽतिदेशस्य प्रकर्षाभावः'- तै.ब्रा.भा, वेदभाष्यकारेण सायणाचार्येण उक्तम्।
11. ' एतद्वै जरामर्यं सत्रं जरया ह्येवास्मात् मुच्यते मृत्युना वा' - शत.ब्रा, १२४११.
12. 'अग्निहोत्रसंज्ञें कर्मणि सायं प्रातश्च यजमानः उद्धर इति प्रेषम् अध्वर्युं प्रति ब्रुयात्। एतच्चाध्वर्युकर्त्तृकहोमपक्ष'- विद्याधरकृतव्याख्या। 'उद्धरेति यजमाना ब्रुयात् प्रातरग्निहोत्रे' - का.श्रौ, ४.१३.१.

13. आप.श्रौ- ६/१३/९-तथ्यसूत्रम्।
14. दर्शपूर्णमासाविष्टीनां प्रकृतिः- आप.श्रौ, २४/३/३२.
15. दर्शपूर्णमासौ तु पूर्णं व्याख्यास्यामस् तन्त्रस्य तत्राम्नाततत्वात् इति- आ.श्रौ, १/१/३.
16. 'ताभ्यां यावज्जीवं यजेत। त्रिंशतं वा वर्षाणि। जीर्णो वा विरमेत्' - शत.ब्रा, ३/१४/११-१३.
17. 'तस्माद्दर्शपौर्णमासयोर्यज्ञक्रतोश्चत्वार ऋत्विजः' - तै.सं, २/३/६.
18. 'पक्वपिष्टपिण्डपुरोडाशः इत्युच्यते' - सायण(आ.श्रौ)
19. पूर्वमीमांसा- ४/४/१९-२१.
20. 'न वा उ एतन्मियसे न रिष्यसि देवा-निदेषि पथिभिः सुगेभिः। यत्र सन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधातु॥' – यजुः.सं, २/६/९/४९.
21. आख्यायिका-ऐ.ब्रा, २/६/३.
22. ऋक्.सं,-९.
23. वसन्तेऽग्निष्टोमः- का.श्रौ, ७/१/५.
24. 'यदि सोमं न विन्देत् पूतिकानभिषुणुयात्' - ता.ब्रा, ९/५/३.
25. मै.सं, ४८३, कौ.ब्रा-२६/५, १७/७.
26. 'अग्नावैष्णवम् एकादशकपालं निर्वपेत्' इति – ऐ.ब्रा, १/१.
27. पुनर्वा एतमृत्विजा गर्भं कुर्वन्ति यं दीक्षयन्ति इति- ऐ.ब्रा, १/१.
28. 'द्वादशाह सत्रमहीणश्च' - का.श्रौ, १२/१/४.
29. 'यजमानाः सत्रे सर्वेषु' - का.श्रौ, १२/१/७.
30. 'द्रव्यं देवता त्यागः'- का.श्रौ, १/२/२.
31. गी.उ.९/१.

## Abbreviations

* ई.उ = ईशोपनिषद्।
* का.श्रौ = कात्यायन-श्रौतसूत्रम्।
* नि = निरुक्तम्।
* ऐ.ब्रा = ऐतरेय-ब्राह्मणम्।
* तै.ब्रा = तैत्तिरीय-ब्राह्मणम्।
* शत.ब्रा = शतपथ-ब्राह्मणम्।
* कौ.ब्रा = कौषीतकि-ब्राह्मणम्।
* ऋ.सं = ऋग्वेद-संहिता।
* ऐ.आ = ऐतरेय-आरण्यकम्।
* तै.सं.भा = तैत्तिरीय-संहिता भाष्यम्।
* आप.श्रौ = आपस्तम्व-श्रौतसूत्रम्।
* आ.श्रौ = आश्वलायन-श्रौतसूत्रम्।
* तै.सं = तैत्तिरीय-संहिता।

* यजु.सं = यजुर्वेद-संहिता।
* ता.ब्रा = ताण्ड्य-ब्राह्मणम्।
* मै.सं = मैत्रायणी संहिता।
* गी.उ = श्रीमद्भगवद्गीतोपनिषद्।

## Bibliography


- चट्टोपाध्यायः, अमरकुमारः, आश्वलायन-श्रौतसूत्र— एशियाटिक् सोसाइटि, 2002 खीः।
- स्वामी गम्भीरानन्द, उपनिषद-ग्रन्थावली— सम्पादित, उद्बोधन कार्यालय, October, 2015.
- बन्दोपाध्याय, डः श्रीमती शान्ति, वैदिकयुगेर यागयज्ञः— संस्कृत पुस्तक भाण्डार, अग्रहायन १४१७।
- वसु, डः योगीराज, वेदेर परिचयः— संस्कृत बुक् डिपो, १ला वैशाख, १४२३.
- चट्टोपाध्याय, अमरकुमार, वैदिक यज्ञः— संस्कृत पुस्तक भाण्डार, नबबर्ष १४२४.
- त्रिवेदी, —रामेन्द्रसुन्दर , यज्ञकथा प्राची पावलिकेशनस्।
- अमृतत्वानन्द, स्वामी, वेदान्तसारः— उद्बोधन कार्यालय, December 2016.
- लाहिडी, डः प्रबोधचन्द्र, पाणिनीयम्— पण्डित हृषीकेश शास्त्री , डः प्रद्योतकुमार बन्दोपाध्याय, दि ढाका स्टुडेन्टस् लाइब्रेरी, सप्तम संस्करण July 2012.


——-